चागतिकगतिन्यायेन यथाशक्ति…काव्यं करणीयताम्…अर्हति VakroJī. 46. 9.

**अगतिकता** ( agatika-tā ) *f.* state or condition of having no other alternative क्वचिद्विशिष्टविधिनिषेधाङ्गीकरणं तदगतिकतयैव NyāySu.( Ja. ) 29B. 8 (*on* i. 1. 1); 356B. 13 (*on* ii. 2. 6); RasGaṅ. 254. 2.

**अगतिकत्व** ( agatika-tva ) *n.* helplessness, state or condition of having no other alternative अतो गौरवमपि नागतिकत्वादेवादोष इति व्याख्येयम् MīmāKau. i. 233. 26 (*on* i. 4. 9); ii. 278. 15 (*on* iii. 2. 27); फलाकाङ्क्षाशान्तेर्नागतिकत्वमिति प्रतिपादनार्थं तदधिकरणमित्यर्थः MayūMāli. 10. 32 (*on* i. 2. 2); 58. 5 (*on* i. 4. 2)

**अगतिकल्पना** ( agati-kalpanā ) *f.* assumption of non-movement परोक्षेऽगतिकल्पना VedāntSiSūMañ. 1. 115.

**अगतिकागतिन्याय** ( agatikāgati-nyāya ) *m.* the maxim of the last resort ( cf. अगतिकगतिन्याय ) अनृजवो हि पूर्वमार्गाः…अगतिकागतिन्यायेनाश्रिताः NyāyRaMā. 67. 14; अगतिकागतिन्यायेन व्रीहियववाक्ययोस्तदाश्रयणम् PrakaVi. 857. 15.

**अगतिकोद्धरण** ( agatikoddharaṇa ) *n.* uplifting of the helpless, releasing the helpless त्वां विना कोऽपरो लोकेऽगतिकोद्धरणक्षमः KathāKau. 15. 28.

**अगतिक्रिय** ( a-gatikriya ) *adj.* not performing the act of going किं वाहनाद्यैरगतिक्रियाणाम् VarāṅgaC. 10. 50.

**अगतिज्ञ** ( a-gatijña ) *adj.* not knowing the direction or the way मृग्यः…तवागतिज्ञं समबोधयन्माम् । व्यापारयन्त्यो दिशि दक्षिणस्याम्…विलोचनानि RaghuVa. 13. 25 = VakroJī. 116. 5; AlaṅkāSa. 145. 1; लज्जान्वितो विप्रः… । चिन्तामवाप…अगतिज्ञो हि पावने SkandP. v(3). 222. 4.

**अगतितस्** ( agati-tas ) *adv.* for want of any other alternative अगतितो वाक्याल्लक्षणावृत्तिराश्रिता TantrVā. 703. 16 (*on* iii. 1. 12)

**अगतिता** ( agati-tā ) *f.* motionlessness, steadiness पाशैः केन सदागतेरगतिता सद्यः समासादिता MudrāRā. 7. 6.

[1]**अगतित्व** ( agati-tva ) *n.* absence of any other alternative, helplessness अर्थवादस्त्वगतित्वाद्विधिवशेन वर्तते TantrVā. 330. 21 (*on* i. 4. 22); क्वचित्पुनर्विशिष्टविधानमपि भवत्यगतित्वात् TātpaṬ.( Vā. ) 45. 19 (*on* i. 1. 1); परस्यागतित्वं दर्शयितुमाह S'rutaPra. iB. 189. 26 (*on* i. 1. 12); अगतित्वं चानन्यगतित्वम् VedāntRaMañ. 3. 8 (102. 10); KaliViḍ. 9.

[2]**अगतित्व** ( agati-tva ) *n.* state of being different from *gati* (Gr.) छन्दोऽर्थमिति चेन्नागतित्वात् Vār. 2 *on* P. viii. 1. 70; SiddhāKau. 33B. 16; 159B. 4; क्रियायोगाभावादगतित्वम् LaS'abdeS'e. ii. 58. 4.

**अगतिपरिहार** ( agati-parihāra ) *m.* removal or refutation of the absence of alternative प्रतिषेधाप्रामाण्येनागतिपरिहारः कृतः NyāySu.( So.) 17. 27 (*on* i. 2. 5)

**अगतिप्रायश्चित्त** ( agati-prāyaścitta ) *n.* expiation with regard to the deceased persons who could not obtain good condition after death इति श्रीशातातपीये कर्मविपाकेऽगतिप्रायश्चित्तनिरूपणं नाम षष्ठोऽध्यायः S'ātāSm. 6 Colophon.

**अगतीक** ( agatī-ka ) *adj.* [Debru. p. 413] the last resort, with no alternative course अगतीकगतिर्ह्येषा या राज्ञा सह जीविका MahāBhā. xii. 83. 24.

**अगतुङ्ग** ( aga-tuṅga ) *adj.* lofty like a mountain लाटोऽगतुङ्गः…कुमारं निजघान DvyāśraKā. 6. 93.

**अगतोच्छिष्टांशघात** ( agatocchiṣṭāṁśa-ghāta ) *m.* product (of the *khaṇḍas*) which are yet to be taken into account and of the remaining degrees षट्शैलाष्टनवार्कधृत्यादितिजाः खण्डानि कार्यं नतांशाशांशप्रमखण्डैक्यमगतोच्छिष्टांशघाताद्युतम् ।…दृग्ग्रहः GrahaLā. 9. 18.

**अगत्यन्तर** ( a-gatyantara ) *adj.* [ *f.* -ā ] having no other course or alternative ( सः ) तामगत्यन्तरामात्मवश्यामकरोत् DaśKuC. 118. 8.

**अगत्यभाव** ( agatyabhāva ) *m.* absence of no other alternative, absence of having no other recourse यत्र द्वयोरपि तुल्यबलत्वं तत्र विकल्पव्यतिरेकेण गत्यभावादगत्याश्रीयते । … न च तत्रापि … समुच्चयसंभवादगत्यभावः MīmāKau. i. 16. 1 (*on* i. 3. 3)

**अगत्यर्थ** ( a-gatyartha ) *adj.* not having the sense of *gati* (Gr.) प्रादिग्रहणस्येहागत्यर्थत्वात्कर्मप्रवचनीयानां प्रतिषेधः Pradī. ii. 435B. 17 (*on* ii. 2. 18); ii. 436A. 30 (*on* ii. 2. 18)

**अगत्वर** ( a-gatvara ) *adj.* **A** not moving (i. e. static) अगत्वरं सद्विज्ञानं भूतार्थं ढौकते कथम् BṛĀraUBhVā. i. 4. 457; **B** not vanishing (i. e. permanent) यशः … अर्जनीयमगत्वरम् PāṇḍaC. 10. 336; एतद्दृतुयुग्ममगत्वरं तु ।… वीरधवलेन विना जनानां वर्षा विलोचनयुगे हृदये निदाघः PrabaCin. 104. 26 = PurāPraSam. 66. 13.

**अगत्वा** ( a-gatvā ) *ger.* **1** not having gone नागत्वा शंकरस्थानम्…दृश्यते हरः MahāBhā. vii. 69. 55; अगत्वैव यावद्गन्तव्यम् NyāyVā. 309. 17 (*on* ii. 2. 39) = TātpaṬ.( Vā. ) 463. 6 (*on* ii. 2. 38); प्राप्यते यदिह दूरमगत्वा…। तीर्थमस्ति न…ऋते भवतस्तत् Kirātā. 18. 25; ( सा ) स्वभवनमगत्वैव तमृषिमभाषत DaśKuC. 45. 11; ब्राह्मणः…राजान्तिकमगत्वैव तपः कुर्यात् BālaKrī. ii. 120. 21 (*on* 3. 251 (? 257) ); न चात्मवदगत्वैव मनसो देहान्तरसंबन्धः NyāyKa. 310. 21; इन्द्रियं यद्यगत्वानागतमर्थं गृह्णीयात् TātpaṬ.( Vā. ) 121. 1 (*on* i. 1. 4); PāṇḍaC. 9. 33; नदीमदीयप्रिययोरन्तिकमगत्वैव वापीं स्नातुमितो ममान्तिकाद्गतासि RasGaṅ. 18. 8; **2** not having attained or obtained or acquired or reached प्रवृत्ते ह्यन्तमगत्वावस्थाने दोषः ĀśvaS'S. II. vi. 4. 22; कलुषा बुद्धिः… । नागत्वान्तं निवर्तेत स्थिता सत्त्ववतां धृतौ ArthS'ā. i. 51. 6 (1. 10); अगत्वा संशयमहम्…। अक्षान्क्षिपन्…। अविदुषो जये MahāBhā. ii. 51. 2; xii. 217. 51; xii. 336. 4; अगत्वा निश्चयं राजा Rāmā. i. 40. 26 = i. 41. 9; अगत्वा निष्कृतिं तस्य नारोक्ष्येऽहं सुरालयम् MārkP. 8. 245; तेन सहैकवाक्यतामगत्वा S'ābaBh. 2040. 1 (*on* x. 7. 33); NītiSā. 12. 6; शब्दः संबन्धमगत्वैव नष्टत्वादनर्थकः NyāyRa. 795. 11 (*on* 6. 256); अगत्वा खलनम्रताम् । …यत्स्वल्पमपि तद्बहु VyaktiVi. 5. 16 = S'ārṅgaPa. 307 = Subhāṣi. 2660; अगत्वा शरणं ये तु मृताः BṛBrahmaS. i. 2. 78.

**अगत्वाग्राहित्व** ( agatvāgrāhi-tva ) *n.* the nature of grasping (an object) without reaching it, perception (of an object) without going (to it) श्रोत्रस्य चक्षुष इव गत्वाग्राहित्वे शब्दे दिक्संशयो न स्यादिति चेत् । अगत्वाग्राहित्वे दिङ्निश्चयोऽपि न स्यात् NyāySu.( Ja. ) 212A. 10 (*on* i. 4. 6)

[1]**अगद** ( a-gadá ) *adj.* **1** [ AltGr. II. i. nt. p. 14 ] free from disease, healthy अग्निष्टद्विश्वादगदं कृणोतु ṚV. x. 16. 6; अधा शतक्रतो यूयमिमं मे अगदं कृत ṚV. x. 97. 2 = VājaS. 12. 76; S'atBr. VII. ii. 4. 27; अथ त्वमगदश्चर AV. iv. 17. 8; तमु मे अगदं कृधि AV. v. 4. 6; v. 29. 6; vi. 95. 3; छन्दोभिरेवैनमगदं करोति TaiS. III. 4. 9. 3; अगद ऐक्ष्वाक आस AitBr. 33. 4 ( 851 ); TaiBr. III. vii. 3. 6; ईश्वरो ह्यगदो भवितोः JaimiBr. 1. 46; अगदो हैव भवति JaimiUBr. iv. 2. 5; स यद्यगदः स्यात्पुत्रस्यैश्वर्ये पिता वसेत् KauṣīBrU. 2. 10; उद्धैव तत एत्यगदो ह भवति ChāndoU. iii. 16. 2; प्रकृत्यागदे ĀśvS'S. I. vi. 9. 7; BaudhGS. iii. 7. 27; ĀpaGS. vii. 18. 4; तेनागदो भवत्यन्यं वा भावमापद्यते SuśruS. iv. 14. 8; CaraS. i. 28. 4 (1922 Ed.); BhelaS. 14. 11 (1. 9); त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः । तदृणं प्राप्नुयात्सर्वम् ManuSm. 8. 107; मुच्यते सर्वपापेभ्यो गदी वाप्यगदो भवेत् AgniP. 258. 13; तस्य प्रयच्छति … आयुश्च दीर्घमगदम् ĪśanS'iPa. i. 16. 100; **2** free from judicial affliction [Apte]

[2]**अगद** ( a-gada ) *adj.* who does not have a mace ( *gadā* ) अगदस्याप्यधनुषः … । बाहुभ्यां युध्यमानस्य कस्तिष्ठेदग्रतः पुमान् MahāBhā. v. 50. 44; CaṇḍiS'. 21.

[3]**अगद** ( a-gada ) *adj.* not speaking or telling [Apte]

**अगद** ( a-gadá ) *m.* **1 A** presiding deity of health अगदं जानुभ्याम् TaiS. V. vii. 13. 1; **1 B** health, absence of disease औषधान्यगदो विद्या दैवी च विविधा स्थितिः । तपसैव प्रसिद्ध्यन्ति ManuSm. 11. 237; अगदो गदाभावः । नैरुज्यम् ManvaMu. 497. 15 (*on* 11. 237); **2 A** antidote (to a poison) प्रज्ञाशरेणाभिहतस्य जन्तोश्चिकित्सकाः सन्ति न चौषधानि । …नाप्यगदाः सुसिद्धाः MahāBhā. v. 37. 54; विषं पीत्वा यदगदं समये पातुमिच्छसि Saund. 12. 25; विषघ्नैरगदैः स्पृष्टम् … सिद्धमन्त्रं निवेदयेत् SuśruS. i. 46. 448; CaraS. i. 1. 96 (1941 Ed.); इति चिन्ताविषघ्नोऽयमगदः किं न पीयते PañcT. 2. 68 (245. 8) = Tantrākhyā. 77. 12 = Hitopa. 4. 9 = S'atTrayī. 666 = SūktiRa. 200. 26; अगदं वा घृताप्लुतम् ( पिबेत् ) AṣṭāHṛ. vi. 36. 54; पुनरनेनागदेन सङ्गमितेऽम्भसि तां मालां मज्जयित्वा स्वदुहित्रे देया DaśKuC. 140. 22; कालव्यालावलीढं जगदगद इवोत्थापयन् SūryS'. 31; एष जीवनो नामागदः परं सर्वविषौषधम् AṣṭāSam. i. 47. 8 (1. 8); SiddhYo. 20. 7; ViṣṇuDhaP. ii. 56. 68; एषोऽगदः सर्वविषाणि हन्यात् BhaviP. 73B. 36 (i. 35. 44); एष दौ[ : ]शील्यदुष्टानां विषविष्कम्भणोऽगदः PrātiSū. 4. 14; S'ārṅgaPa. 2925; **2 B** *mantra* that protects from poison अगदा विषघ्नमन्त्ररूपाणि ManvaVi. 1462. 6 (*on* 11. 237)

**अगद** ( a-gada ) *m.*, *n.* **1** medicine, drug आक्रीडानां गृहाणां च गदानामगदस्य च । प्रज्ञावन्तः प्रवक्तारः MahāBhā. xii. 229. 8; इत्यनेन प्रयोगेण काले सेवितुमर्हसि । प्रतिपक्षान् वितर्काणां गदानामगदानिव Saund. 15. 65; भेषजौषधभैषज्यान्यगदो जायुरित्यपि AmaK. 1174; CaṇḍiS'. 21; अगदा व्याध्युपशमभेषजानि ManuBh. ii. 445. 7 (*on* 11. 236); अभिनवजनमनोह्लादनवचनागदप्रयोगभट्टारक…पाटलिपुत्रात् ( समागतोऽस्मि ) YaśasCam. ii. 297. 23; ज्वरामयार्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमाम्भः BhāgP. v. 12. 2; iv. 11. 31; परोक्षवादो वेदोऽयं बालानामनुशासनम् । कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा BhāgP. xi. 3. 44; ततः स विप्रो वात्सल्या-